# जगदीश्वरवैभवमित्यस्य महाकाव्यत्वम्

रञ्जनसिग्देलः
उपप्रा.
विश्वविद्यालयविद्यापीठम्
ने.सं.वि. दाङ्

**शोधसारः**

"जगदीश्वरवैभवम्" इति काव्यं श्रीभीमकान्ताभिधानेन नेपालजनुषा कविना लिखितम् । भगवद्विष्णुभक्तिपरकं काव्यमिदम् । श्रीमद्भागवतमहापुराणे विद्यमानाद् ध्रुवोपाख्यानादुद्धृतमस्य वृत्तम् । अष्टसु सर्गेषु उपनिबद्धम् अपि इदं काव्यं कलेवरदृष्ट्या लघु । तेषु अष्टसु सर्गेषु कस्मिँश्चिदपि सर्गे पञ्चाशदधिकाः श्लोका न सन्ति । आपाततः काव्यमिदं लघुकाव्यम् इव प्रतीयते । एवञ्च कविभीमकान्तपन्थिना कुत्रापि (आमुखे पुष्पिकावाक्ये च) स्वमुखेन अस्य काव्यस्य महाकाव्यत्वेन नोल्लिखितम् । अतोऽस्य पद्यात्मिकाया कथाया महाकाव्यत्वेन सन्देग्धव्यादस्मिन् शोधलेखे महाकाव्यत्वप्रयोजकत्वेन गृहीतानां तत्त्वानां कियत्तरः सन्निवेशः? महाकाव्यत्वपदवीमारोढुं योग्या नवेयं रचना ? अथवा अन्यस्मिन् महाकाव्येतरकाव्यभेदे वा एतद् गणनीयमिति प्रश्नानुपस्थाप्य प्राचीनैराचार्यैर्विहितानां काव्यलक्षणानां निकषोपले संघट्य प्रकृतकाव्यं महाकाव्यमेवेति साधितम् वर्तते ।

**शब्दकुञ्जिकाः** ध्रुवः, भगवद्विष्णुः महाकाव्यम्, सर्गाः,

**शोधविषयपरिचयः**

शोधस्य विषयो जगदीश्वरवैभाभिधेयं काव्यं सामान्यं काव्यमुत महाकाव्यं वेति निर्धारणम् । इदं काव्यं विंशतिशताब्द्याम् उत्पन्नेन नैपालकेन श्रीभीमकान्ताभिधानेन कविना लिखितम् । काव्य-रचनाया दशाब्देरनन्तरम् षट्पञ्चाशदुत्तर-द्विसहस्रतमे वैक्रमाब्दे प्रकाशितेऽस्मिन् महाकाव्ये अष्टौ सर्गाः सन्ति । अस्य वृत्तं श्रीमद्भागवत-महापुराणस्य चतुर्थस्कन्धस्य अष्टमसर्गादारभ्य आद्वादशसर्गं विवृतस्यौत्तानपादिनो भगवद्विष्णोरनन्यभक्तस्य ध्रुवस्य चरितादुद्धृतं वर्तते ।

राज्ञो ध्रुवस्य वृत्तं श्रीमद्भागवतातिरिक्तं विष्णुपुराणेऽपि चर्चितं प्राप्यते । उभयत्र वर्तिनो विषयवस्तुनो घटनाविन्यासक्रमस्य च साम्यवैषम्ययोर्विवचनेन जगदीश्वरवैभवीयं वृत्तं श्रीमद्भागवतीयमिति सिद्ध्यति । तत्रत्यं "ध्रुवोपाख्यानम्" इति नाम्ना प्रथितं चतुःसर्गात्मकं कथावस्तु प्रतिभापटोः पण्डितस्य भीमकान्तस्य लेखनीसरणिमारुह्य अष्टसर्गात्मकं जातमिति एतत्काव्यपर्यालोचनात् स्पष्टीभवति । पुराणप्रसिद्धस्य राज्ञो ध्रुवस्य वृत्ते केन्द्रितमिदं महाकाव्यं भगवद्भक्तिपरकं वर्तते । उत्तरस्यां दिशि नभसि देदीप्यमानं नक्षत्रं ध्रुवमधिकृत्य नेपालीभाषायामपि लोककथा प्रचलिता प्राप्यते । अत औत्तानपादिनो कथा न केवलं शास्त्रीया अपितु नैपालीया लोककथा अपि वक्तुं शक्यते । पूर्वं विद्यालयस्तरीयपाठ्यपुस्तकेऽपि एषा कथा अनिवार्यपाठ्यविषयतया चिराय निर्धारिता येन अधीतेषु विद्यालयेषु ध्रुवकथां न्यूनाधिकं अजानन्तो जना विरलतया एव प्राप्येरन् ।

महाकाव्येऽस्मिन् कविना निजप्रतिभया अभिज्ञानशाकुन्तले कालिदासेन इव ध्रुवोपाख्याने वर्णितवृत्तं यथावश्यकं परिवर्त्य महाकाव्ये नवीनं लालित्यमाहितं दृश्यते । प्रामुख्येन ध्रुवस्य वंशवृत्तमारभ्य तदीया ध्रुवपदप्राप्तिपर्यन्तिका घटना महाकाव्येऽस्मिन् वर्णिताः प्राप्यन्ते । यथाप्रसगं सृष्टिक्रमोऽपि वर्णितोऽस्ति ।

लोके महतां स्थूलकायानां वा काव्यानां महाकाव्यत्वेन व्यवहृयमाणत्वात् कलेवरदृशा लघीयसि प्रकृते जगदीश्वरवैभवे अनधीतकाव्यशास्त्राणां महाकाव्यत्वस्य संदेहम् उत्थितुं शक्यत्वाद् वपुषा महान्ति एव काव्यानि न महाकाव्यपदभाञ्जि अथ च कायेन लघिष्ठानि अपि महाकाव्यलक्षणानुसारीणि काव्यानि तत्पदभाञ्जि इति दर्शनम् अस्य शोधपत्रस्य प्रमुखम् उद्देश्यम्। तदुद्देश्यं प्राप्त्यर्थम् अत्र शोत्रपत्रे महाकाव्यस्य लक्षणं प्रस्तुत्य कथम् एतत् काव्यं तल्लक्षणं संगच्छते इति प्रदर्शितं वर्तते।

**समस्याकथनम्**

समस्या अनुन्विष्य तासां समाधानार्थं सम्पाद्यं कार्यमनुसन्धानम्। यो विषयोऽनुसन्धेयः स एव समस्या। समस्या यावती सूक्ष्मा तावद् एव विशिष्टम् अनुसन्धानम्। महतीः समस्या उपस्थाप्य विहितं अनुसन्धानं न केवलम् अविशिष्टम् अपितु विषयान्तरातिप्रसज्याद् विषयविज्ञानाम् अरुचिकरञ्च। अतो जगदीश्वरवैभवस्य महाकाव्यत्वमिति शीर्षके विधीयमानम् अनुसन्धानमिदं तच्छीर्षक एव परिच्छिन्नम्। अर्थाद् अधोलिखितायाम् एकस्यामेव एव समस्यायाम् अयं शोधलेखः केन्द्रितः।

» जगदीश्वरवैभवे काव्ये महाकाव्यस्य लक्षणं संगच्छते न वा ? संगच्छते चेत् कथम् ?

**उद्देश्यम्**

शोधलेखनस्य उद्देश्यं समान्यतः समस्याकथनखण्डे उत्थापितायाः समस्यायाः समाधानमेव। तत्र जगदीश्वरवैभवे काव्ये महाकाव्यस्य लक्षणं संगच्छते न वा ? संगच्छते चेत् कथम् ? इति समस्यात्वेन दर्शितम्। अतः प्रकृतस्य जगदीश्वरवैभवमिति काव्यस्य महाकाव्यत्वसाधनमेव अस्य शोधलेखस्य उद्देश्यम्।

**पूर्वाध्ययनसमीक्षा**

पन्थिनो काव्यत्रयेषु जगदम्बिकावैभवमधिकृत्य विद्यावारिधिस्तरीया समीक्षा विहिता प्राप्यते चेद् अपरयोर् जगदीश्वरवैभवविविधपद्यावल्योर् विद्यावारिधिस्तरीया समीक्षा अद्यावधि न केनापि विहिता। तथापि अनयोर् विविधान् पक्षान् विविच्य विहिताः समीक्षा विविधासु पत्रिकासु प्रकाशिताः प्राप्यन्ते। ता सर्वाः इतस्ततः प्रकीर्णाः समीक्षाः संकलय्य तथा च अन्यान् अपि नवीनान् लेखकान् अनुरुद्ध्य लेखायिताश्च संगृह्य कविपुत्रेण लक्ष्मीकान्तपन्थिना स्वपितुः शतवार्षिकोपलक्ष्ये गुल्मीमण्डलात् प्रकाशितायाः "हाम्रो पुरुषार्थ" इत्यभिधायाः पुस्तकाकारायाः पत्रिकाया उननवतितमेऽङ्के "पं. भीमकान्तपन्थी शतवार्षिक स्मृति विशेषाङ्क" इति नाम्ना प्रकाशिता वर्तन्ते। ६७६ पृष्ठात्मकेऽस्मिन् पुस्तके "संस्मरणखण्ड", "समीक्षा खण्ड", "संस्कृत खण्ड", "परिशिष्ट" इति चत्वारः खण्डा वर्तन्ते। तेषु प्रकृतशोधकार्ये उपकारीभूतानां समीक्षाखण्डस्थानां संस्कृतखण्डस्थानाञ्च केषाञ्चन लेखानां विवरणं नीचैः प्रदत्तमस्ति।

**शर्मा मुकुन्दः** (२०७७) "जगदीश्वरवैभवम् महाकाव्यमा उपस्थापित विषय" इति शीर्षके लिखिते लघुलेखे सावतरणं जगदीश्वरवैभवस्य परिचयं प्रस्तौति। तत्र स जगदीश्वरवैभवे विविधछन्दसाम् अलंकाराणाञ्च सद्भाव इति कथयति परं तत्सिद्धये न कमपि श्लोकमुदाहरति। टीकारामपन्थिनो वचसा अस्य महाकाव्यत्वमपि साधयति। न तु सयुक्तिकम्। तन्मतानुसारं इदं काव्यं पारमार्थिकोद्देश्येन रचितं भक्तिभावानुभावितम्। एतादृशो भावानुभाविता रचना न भौतिकदृशा समीक्ष्याः। "*पारमार्थिक उद्देश्यले अभिप्रेरित भएर रचिएका भक्तिभावानुभावित रचनाको मूल्य भैतिक अँखाँले हेरेर हुँदैन। यसै परिप्रेक्ष्यमा कि श्रीभीमकान्त पन्थीको संस्कृत महाकाव्य जगदीश्वरवैभवम्को*

*समीक्षा वा यसमा उपस्थित विषयको चर्चा गर्नु समीचीन हुन्छ"* । स ईशावास्योपदिषद आद्यं मन्त्रम्, अस्यैव काव्यस्य प्रथमाध्यायस्य चतुश्चत्वारिंशम् अनन्तरम् अष्टमाध्यायस्य त्रयस्त्रिंशं श्लोकम् उद्धरन् अस्य काव्यस्य निवृत्तिपरकत्त्वं साधयति । संक्षेपेण, काव्यगतगुणदोषाणां विवेकापेक्षया प्रकृतकाव्यस्य निरतिशयं भक्तिमत्वं साधनमेव शर्मणोऽभिप्रेतम् इव प्रतीयते।

**सिग्देलरञ्जनेन** (२०७७) "जगदीश्वरवैभवम् एक समीक्षा" इति शीर्षके लेखे अस्य महाकाव्योपरि वक्ष्यमाणेषु सप्तषु उपशीर्षकेषु समीक्षा विहिता वर्तते । ते उपशीर्षकाः क्रमशः – "१) जगदीश्वरवैभवको संरचनागत परिचय, २) यसको काव्यकथा, ३) जगदीश्वरवैभवम्मा भागवती प्रभाव, ४) कविप्रतिभा उन्मेष, ५) अलंकार विलास, ६) महाकाव्यमा केही खट्किएका प्रसंग, ७) निष्कर्ष" इति । "संरचनागतपरिचय" इत्युपशीर्षके अस्मिन् काव्ये कति सर्गाः सन्ति? काव्यं कति पृष्ठेषु विततम् अस्ति, अस्य प्रकाशकः कः, कैर्विद्वद्भिर् अस्य भूमिका लिखिता इति प्रदर्शितमस्ति ।"काव्यकथासंक्षेप" इति उपशीर्षके अस्य काव्यस्य मूलकथा, पटकथा च संक्षेपेण प्रस्तुता वर्तते । "जगदीश्वरवैभवम्मा भागवती प्रभाव" इत्युपशीर्षकेऽस्मिन् काव्ये उपजीव्यभागवतीयकथायाः जगदीश्वरवैभवे कति प्रभाव इति अन्विष्टं वर्तते

अन्विषता तेन प्राप्तं यत् काव्यमिदं मूलग्रन्थाद् अत्यन्तं प्रभावितमिति। प्रभावे निमग्नस्य अस्य काव्यस्य उपजीव्येन सह साम्यमात्रं उद्घाटयति काव्यरचनाया औचित्यमेव नश्येत इति भिया सिग्देलेन "महाकाव्यमा भागवती वैषम्य र कविप्रतिभा उन्मेष" इत्युपशीर्षके अस्य काव्यस्य कवेश्च वैशिष्ट्यं साधितं वर्तते। "अलंकारविलास" इत्युपशीर्षकेऽपि यथोपशीर्षकं कस्मिन् श्लोके के अंलकाराः कथञ्च ते अलंकुर्वन्तः सन्ति इति दिग्दर्शितमस्ति । "महाकाव्यमा खट्किएका केही प्रसंग" इति उपान्ते उपशीर्षके असाम्प्रतिकान्, अधुनातनसमये सर्वथा असंभवसिद्धान् उत्तानपादस्य एकादशार्बुदसमाराज्योपभोगसदृशान् विषयानुपस्थाप्य काव्ये तेषां परिहारस्य अपेक्षा दर्शितास्ति। अन्तिमे "निष्कर्ष" इत्युपशीर्षके लोकापवादभिया उद्घाटितानपि दोषान् समाच्छाद्य कवेश्च गरिमाणं बलात् साधितमस्ति। अतोऽस्य निष्कर्षो न तावान् सन्तुलितो वर्तते।

**महानन्द तिमिल्सिनया** (२०७३) स्वीये जगदम्बिकावैभवमहाकाव्यस्य साहित्यिकमनुशीलनमिति विद्यावारिधिशोधप्रबन्धे यथाप्रसङ्गं जगदीश्वरवैभवस्योपरि अपि विमर्शो विहितो वर्तते । शोधप्रबन्धस्य प्रकृतेरनुरूपम् अत्र विस्तरेण चर्चा विहिता प्राप्यते । विशेषतोऽस्य द्वितीयाध्याये महाकवेर्भीमकान्तपन्थिनो व्यक्तित्वकृतित्वादिविवेचनमिति शीर्षके पन्थिनः कविव्यक्तित्वस्य तदीयकृतीनाञ्च परिचयं ददता जगदीश्वरवैभवमपि विविक्तं वर्तते।

उपर्युक्तिदिशा प्रथमे **जगदीश्वरमहाकाव्यस्य परिचयः** इति उपशीर्षके तिमिल्सिनया काव्यमिदं कदा प्राकाश्यं गतवान्, केन प्रकाशितं, पृष्ठाः, अध्यायाश्च कति सन्ति, कथावस्तु कीदृशम्, उपजीव्या कथा का, काव्यमिदं कतमं सिद्धान्तमाश्रित्य रचितमिति उल्लिखितमस्ति । **जगदीश्वरवैभवमहाकाव्यस्य महाकाव्यत्व**मिति द्वितीयोपपशीर्षके प्राधान्येन स्ववचसा एव अस्य काव्यस्य महाकाव्यत्वं साधितम् । यथा अस्य महाकाव्यस्य अष्टौ सर्गाविच्छिन्नत्वाद्, भगवन्तं जगदीश्वरं नायकत्वेन उपस्थापितत्त्वात्, विविधछन्दसां प्रयोगात्, सर्गावसाने भाविकथासंसूचनाद् अवान्तरछन्दःप्रयोगाच्च इदं काव्यं महाकाव्यमेवेति उक्तं परं न च तेषाम् सर्वेषां पोषकम् उदाहरणं प्रदत्तम् । **जगदीश्वरवैभवमहाकाव्यस्य कथास्रोतो**ऽभिधाने तृतीयोपशीर्षके "जगदीश्वरस्य कथास्रोतः

श्रीमद्भागवतम् । प्रतिपाद्यञ्च भगवन्महात्म्यम्" इति लिखितं वर्तते । **जगदीश्वरवैभवमहाकाव्यस्य उद्देश्य**मिति चतुर्थोपशीर्षके भगवद्भक्तिरेव अस्य काव्यस्य उद्देश्यमिति प्रतिपादितं वर्तते । **जगदीश्वरवैभवमहाकाव्यस्य कथावस्तु** इति पञ्चमोपशीर्षके कथायाः सारम् आनुपूर्व्येण प्रस्तुत्य अनन्तरं तदेव कथावस्तु प्रतिसर्गम् अतिसंक्षिप्य, एकैकवाक्ये संमित्य प्रस्तुतं वर्तते । **जगदीश्वरवैभवमहाकाव्यस्य चरित्रचित्रण**मिति षष्ठोपशीर्षके अत्र काव्ये विविधभूमिकासु आगतानां प्रधानपात्राणाम् स्तोकेन उल्लेखो विहितो वर्तते । काव्यस्य नायकत्वेन भगवान् जगदीश्वर उपात्तः चेद् ध्रुवः प्रधानपात्रत्वेन गृहीतो वर्तते । अत्रैव सर्वाथा असम्बद्धा काव्यस्य प्रयोजनसिद्धिश्च तिमिल्सिनया विहिता । छन्दःप्रयोग इति सप्तमे उपशीर्षके अस्य महाकाव्यस्य कस्मिन् सर्गे किं छन्दः, सर्गान्ते च किं छन्द इति प्रतिसर्गं सर्वेषां छन्दसां नामानि उल्लिखितानि । सर्गान्ते भाविकथासूचनविषये "भाविसर्गस्य कथापि सूचिता" इत्येव लिखितं न च ततोऽन्यत् किमपि तत्र प्राप्यते । **जगदीश्वरवैभवमहाकाव्ये अलंकारप्रयोगः**" इति अष्टमे उपशीर्षके अत्र काव्ये प्रयुक्तानां केषाञ्चन त्रिचतुर्णाम् अलंकाराणां निदर्शनं विधाय अन्येषाञ्च "सदृशानाम् अलंकाराणां प्रयोगोऽवलोक्यते" इत्युक्त्वा समापितं वर्तते । निदर्शितानाम् अलंकाराणां लक्षलक्षणयोः संगतिर्नैव विहिता । **जगदीश्वरवैभवमहाकाव्ये रसगुणादिप्रयोग** इति अन्तिमे उपशीर्षके अत्र काव्ये रसातिरिक्तं "गुणरीतिध्वनिनामपि सद्भावः" इति उक्तं परं तत्कथमिति नैव साधितं वर्तते । बहुनां रसानां सद्भावेऽपि अङ्गिरसत्वेन शान्तरसमुपात्तं वर्तते । तं शान्तरसं स्वतन्त्ररसत्वेन अस्वीकृत्य भक्तेः प्रकारान्तरे अन्तर्भावितं वर्तते । एतदतिरिक्तं तिमिल्सिनायाः शोधप्रबन्धे न जगदीश्वरवैभवसम्बद्धं न किमपि लभ्यते ।

**हरिहरशर्मणा** "जगदीश्वर महाकाव्यः विहंगम दृष्टिमा" इति शीर्षकीये लेखे जगदीश्वरवैभवं यथाशीर्षकं समीक्षा कृता । अर्थाद् विहायसा भ्रमन्तेन विहंगमेन विहिता जगतः समीक्षेव स्थूला समीक्षा कृता वर्तते । अस्य समीक्षायां प्रकृतकाव्यस्य गुणदोषोद्घाटनादधिकं भगवद्भक्तेर्महिमा मण्डितो वर्तते । भगवद्भक्तौ एव मानवजीवनस्य सार्थक्यं तदभावे नैरर्थक्यमिति श्रीमद्भागवतीयं प्रसंगमुद्धरन् तद्भक्तिं वैशद्येन प्रतिपादयति शर्मा । कवेः पन्थिन इव वाल्मीकिकालिदासादीनां महाकवीनामपि श्रेयसः कारणं भगवद्भक्तिरेव इति तस्य मतम् । शर्मणो लेखे जगदीश्वरवैभवस्य कलेवरस्य, कथावस्तुनो, संक्षेपेण वर्णानान्तरं गुणालंकाररसानां सद्भावस्य उल्लेखो वर्तते । परं ते ऋते उपमान्त्यानुप्रासाभ्यां ते कुत्र कुत्र, कथं वेति नैव दर्शितम् । जगदीश्वरवैभवस्य प्रतीयमानं शीर्षककथावस्तुनोर् वैषम्यं काव्यकृत्पन्थिनो वचसा निराकृतमस्ति । जगदीश्वरवैभवस्य कमपि पक्षमबलम्ब्य तत्सम्बद्धान् गुणदोषान् अनुद्घाट्य केवलं काव्यस्य काव्यकृदश्च महिम्नो वर्णने केन्द्रितो ऽयं लेखः प्रकृतशोधप्रबन्धस्य कृते न महान् उपकारी ।

**महानन्दतिमिल्सिनया (२०७७)** "कवि पं. भीमकान्त पन्थीका कृतिहरु को संक्षिप्त समीक्षण" इत्याख्ये लेखे पन्थिनो तिसृणामेव कृतीनां समीक्षणं विहितमस्ति । आदौ जगदम्बिकावैभवमहाकाव्यं समीक्ष्य अनन्तरं जगदीश्वरवैभवस्य चर्चा विहिता वर्तते । अत्र लेखे तिमिल्सिनया स्वकीयविद्यावारिधिशोधग्रन्थस्य २.३.२ अध्याये तथा च २.२.६ अध्याये ये विषया उल्लिखिताः त एव यथातथं नेपालीभाषायामदनूद्य प्रकाशिताः । २.३.२ अध्ययायस्था विषया उपरि तच्छोधप्रबन्धस्य समीक्षाप्रसंगे दर्शिताः । अन्यस्मिन् २.२.६. इति अध्याये तिमिल्सिनया कविपन्थिनो काव्ययात्रा वर्णिता । तां काव्ययात्रां स कालक्रमेण "प्राथमिकः" "विकासः" "उत्कर्षः" इति त्रेधा विभजते । पन्थिनः काव्ययात्रायाः प्राथमिकः कालः तन्मतानुसारेण वैक्रमाब्दात् षड्नवत्युत्तरोनविंशतितो द्वादशाधिकद्विसहस्रं यावत्

(१९९६-२०१२) प्रसृतो वर्तते । विकासकालो नवोत्तरद्विसहस्रतः षट्चत्वारिंशदुत्तरद्विसहस्रं (२००९-२०४६) पर्यन्तिकः, तथा च उत्कर्षकालः सप्तचत्वारिंशदुत्तरद्विसहस्रतः सप्तपञ्चाशदुत्तरद्विसहस्रपर्यन्तो (२०४७-२०५७) विततो वर्तते। एनत् सर्वं विवरणं प्रस्तुवता तिमिल्सिनया स्रोतो न उद्घाटितम्। महदाश्चर्यमदः।

**जयराजाचार्येण (२०७७)** "Bhimakanta Panthi: A Tribute" इति शीर्षक अंग्लभाषायां लिखिते लेखे पन्थिनो जीवनयात्राकाव्ययात्रयोरतिसंक्षेपेण चर्चा विहिता वर्तते । पन्थिप्रणीतकाव्यत्रयाणामपि परिचयः प्रस्तुतो वर्तते । जगदीश्वरवैभवकाव्यस्य परिचयं लिख्यमानदिशा प्रदत्तं वर्तते । "Jagadishvaravaibhavam (Glory of the lord of the Universe) is based on the famous story of Dhruva, available in Shrimad Bhagavatam (4.8.12). As the five year old Prince Dhruva saw his stepbrother sitting on his father's lap he wanted to do the same. But he was scornfully shunted by his step-mother Suruci. Hurt Dhruva went to his mother's room and told her about it. But then all that she could say was to bear the pain of insult. But Dhruva decided to go to the forest and do Tapas of lord Jagadishvara (Vishnu) and get his wish fulfilled. So he sneaked out from his home at night and went to the forest and did Tapas for sex months. Pleased with his Tapas Vishnu appeared in font and gave him a boon saying that he would rule as the king of his country for 36000 and then become the North Pole star named Dhruva-Tara eternally staying there." जगदीश्वरस्यवैभवस्य द्वौ श्लोकौ उद्धरन्नेकवाक्येन अस्य काव्यस्य समीक्षा अपि विदधाति। स लिखति– जगदीश्वरवैभवस्य वक्ष्माणाः श्लोकाः श्रीमद्भागवतं सम्यक् स्मारयन्ति। (The poet's verses as such these remind one of Shrimad-Bhagavatam itself.) एतावता जयराजलिखितलेखो जगदीश्वरवैभवस्य वृत्तस्य उल्लेख एव सीमितो वर्तते। काव्यस्य समीक्षा न प्राप्यते। किञ्च कथावृत्तयोरैक्यत्वाद् आचार्येण वर्णितं वृत्तं जागदीश्वरीयम् उत श्रीमद्भागवतीयम् इत्यपि न स्फुट्यते।

**भेषराज–अर्यालः (२०७७)** स्वस्मिन् "महाकवि पं. भीमकान्त पन्थीका व्यक्तित्वका प्रमुख विशेषताहरु " लेखे यथाशीर्षकं पन्थिनो विविधं व्यक्तित्वं प्रकाशयति। तत्र स कवेर्व्यक्तित्वं 'नैजं, शिक्षकीयं साहित्यिकम्' च इति त्रिषु विशिनष्टि। तत्र साहित्यिकं व्यक्तित्वं प्रकाशयन् जगदीश्वरवैभवस्य महाकाव्यत्वम् अपि साधयति। परं तत्साधनं अत्यन्तं परिमितं वर्तते – "महाकाव्य हुनका निम्ति ८ सर्गको काव्य हुनुपर्छ भन्ने संस्कृतको काव्य लक्षणको मान्यता अनुसार यो महाकाव्य अन्तर्गत पर्दछ। वि.सं. २०५५ मा सालमा कवि भीमकान्त पन्थीका ज्येष्ठ सुपुत्र डा. लक्ष्मीकान्त पन्थीद्वारा प्रकाशित यो महाकाव्यका प्रत्येक सर्गमा अनुष्टुप, वंशस्थ, इन्द्रवज्रा, द्रुतबिलम्बित, वसन्ततिलका इत्यादि छन्दहरु मा रचना गरिएको छ। यो महाकाव्य श्रीमद्भागवत महापुराण अन्तर्गत ध्रुवचरितलाई आधार मानेर रचना गरिएको छ।" एतदधिकं प्रकृतमहाकाव्यसम्बद्धं किमपि उल्लेख्यम् अस्मिन् लेखे न प्राप्यते।

**विष्णुराज–आत्रेयः (२०५५)** जगदीश्वरवैभवकाव्यस्य भूमिकाखण्डे "कवि पं. भीमकान्तपन्थीः परिचय र काव्ययात्रा" इति शीर्षकीये लेखे यथाशीर्षकं पन्थिनः परिचयं तदीयकाव्ययात्राञ्च प्रस्तौति। पन्थिनो सर्वाङ्गीणं व्यक्तित्वं प्रचिकाषिशन् स तदीयं परिचयं काव्ययात्राञ्च लिख्यमानेषु चतुर्षु उपशीर्षकेषु उपनिबध्नाति – १.व्यक्तित्वम्, २.अध्ययनम्, ३.जीवनव्यवसायः, ४.काव्ययात्रा इति । अस्मिँल्लेखे विष्णुराजो मूलतः

पन्थीकृतकाव्यानां समीक्षापेक्षया तदीयगुणगरिम्णो गणने मुग्धः प्रतीयते । स एवं लिखति – "कवि पं. भीमकान्त पन्थीका संस्कृत र नेपालीमा रचित फुटकर कविताहरु को परिशीलनबाट उहाँमा देवीदेवताप्रतिको भक्ति, धार्मिकता, सादाचार, सांस्कृतिक मान्यताप्रतिको श्रद्धा, मानवाचार, जीवनशैलीप्रतिको चिन्ता, शिक्षाप्रेम, देशप्रेम, निर्लोभ, निःस्वार्थभाव, लोकहितको कामना, अद्वैत वेदान्तको ज्ञान, योगशास्त्रको ज्ञान, ज्योतिषशास्त्रको ज्ञान, धर्मशास्त्रको ज्ञान, व्याकरणशास्त्रको ज्ञान, छन्दशास्त्रको ज्ञान, कवितात्मक संरचना कौशल, आशुकवित्व, आदि गुण र ज्ञान भएको सहजै बुझ्न सकिन्छ" ।

आत्रेयस्य पन्थिसम्बद्धोऽन्योऽपि लेखो उद्ध्रियमाणे विशेषाङ्के प्रकाशितो वर्तते । "कवि पं. भीमकान्त पन्थीः कृतिकार र कृति" इति शीर्षकीये तस्मिन्नपि लेखे विष्णुराजः पन्थिनो गुणगानमेव विधत्ते । ताः कृतयः कथं वैशिष्ट्यभाज इति सिद्धये न प्रवर्तते ।

**टीकारामपन्थी (२०५५)** "जगदीश्वरवैभवमहाकाव्यस्य संक्षिप्तः परिचयः" इति लेखेन जगदीश्वरवैभवस्य भूमिकाखण्डं विभूषयति टीकारामः । जगदीश्वरस्य काव्यवैशिष्टयसाधनात्पूर्वं टीकारामः सोपक्रमं कविपन्थिनः परिचयं प्रस्तौति अनन्तरं कथावृत्ततत्छीर्षकयोर् आभासमानमसंगतिञ्च प्रौढतर्कैर् निराकुरुते । स तल्लेखं त्रिषूपशीर्षकेषु विभजते । तानि च क्रमशः (क) लुम्बिन्यञ्चलस्थ–गुल्मीमण्डलीय–संस्कृतकविर्–भीमकान्तः पन्थी, (ख) जगदीश्वरवैभवं महाकाव्यं तदीयं वैशिष्टयम् (ग) जगदीश्वरवैभवमिति नाम्नः साफल्यं सार्थकत्वञ्च । स यथोपशीर्षकं कविं जगदीश्वरवैभवकाव्यञ्च विशिनष्टि । अत्र स्थितान् गुणालंकाररसरीतियुतान् काञ्चन श्लोकान् प्रतिनिधित्वेन उद्धरन् जगदीश्वरवैभवस्य काव्यान्तरेभ्यो वैशिष्टं साधयति टीकारामः । यथाक्रमं सलक्ष्यलक्षणम् अस्य काव्यस्य महाकाव्यत्वमपि साधयति । वस्तुतष्टीकारामकृता समीक्षा अन्यासां सर्वासां समीक्षाणाम् अतिशायिनी वर्तते ।

कवेः पन्थिनो जदीश्वरवैभवमतिरिच्य काव्यान्तरौ जगदम्बिकावैभवं विविधपद्यावलीञ्च अवलम्ब्य अनेकाः समीक्षा विहिताः प्राप्यन्ते । तासु समीक्षासु यथाप्रसङ्गं जगदीश्वरवैवभस्य चर्चा अपि न्यूनाधिक्येन प्राप्यत एव । परं तासु अस्य काव्यस्य अतिसंक्षेपतया वर्णनाद् ऋते न कोऽपि गहनो विमर्शः प्राप्यते । अतः तादृशा विवेच्यग्रन्थगुह्यप्रकाशनरहिताः, गुणालंकाररसरीतिनिरूपणविमुखा लेखाः प्रकृतशोधकार्याय अनुपयोगित्वात् तेषामत्र उल्लेखो न विहितः ।

**शोधविधिः**

शोधाध्ययनस्य परम्परितो विधिरत्र शोधस्य विधित्वेन गृहीतो वर्तते ।

**सामग्रीसंकलनम्**

सामग्रीणां संकलनं अनुसन्धानस्य पूर्वाधारः । सामग्रीणाम् अभावे अनुसन्धानम् असम्पाद्यम् असम्भवं वा । सामग्रीः संकलय्य ता विश्लिष्य तासु अनुसन्धानाय उपयुक्ता सञ्चयनं सामग्रीसंकलनस्य प्रयोजनम् । अत्र लेखे सामग्रीः संकलनं प्रामुख्येन प्रथमस्रोतसोऽर्थात् विविच्यमानाद् जगदीश्वरवैभवतः तथा च यथावसरं द्वितीयस्रोतसः (जगदीश्वरवैभवसंबद्धाभ्यो विविधाभ्यः समीक्षाभ्यो) अपि विहितं वर्तते । अथ च महाकाव्यकारस्य पुत्रेण सह जाता वार्ता अपि तथ्याङ्कसंकलनाय महती उपकर्त्री जाता ।

**अध्ययनस्य सीमा**

अनुसन्धित्सितेऽस्मिन् लेखे जगदीश्वरवैभवस्य महाकाव्यत्वं परीक्ष्यत्वाद् महाकाव्यत्वलक्षणानाम् अध्ययने अयं लेखः सीमितः। एतदर्थं महाकाव्यस्य प्रयोजकत्वेन गृहीतानां तत्वानाम् रसगुणालंकारछन्दसाम् तथा च पञ्चसन्धि-अर्थप्रकृति-कार्यावस्थानाञ्च, अध्ययनम् अस्य शोधलेखस्य सीमा।

**विश्वनाथकृतं महाकाव्यलक्षणम्**

किं नाम महाकाव्यत्वम्, तस्य साधकानि तत्वानि कानि, कैर् घटकैः युतं काव्यं महाकाव्यत्वपदम् प्राप्नोति इति विषये भामहादारभ्य विश्वनाथपर्यन्तैर् अनेकैर् आचार्यैः स्वकीयम् अभिमतं प्रकटितम्। तेषामाचार्याणां मध्ये सर्वेषाम् उत्तरवर्तित्वात् तत्परामृष्टलक्षणस्य सांगोपांगत्वाच्च आचार्यविश्वनाथकृतं लक्षणं विद्वद्भिराद्रियते। प्रकृतजगदीश्वरवैभवस्य महाकाव्यत्वमपि तस्मिन्नेव निकषोपले स्थाप्य परीक्ष्यते।

विश्वनाथाचार्यमतानुसारेण महाकाव्ये निम्नाङ्किता घटका भवन्ति - अष्टौ सर्गाः, धीरोदात्तो नायकः, मुखप्रतिमुखादिनाट्यसन्धयः, शृङ्गारवीरशान्तानामेको रसः, चत्वारो वर्गाः, आसर्गम् एकं वृत्तम् परं सर्गावसाने अन्यद् वृत्तम्, खलादीनां निन्दा, सतां गुणकीर्तनम्, समासो नातिदीर्घो नातिस्वल्पश्च, सन्ध्यासूर्येन्दूनां, रणप्रयाणादीनाञ्च वर्णनम्, सर्गान्ते भाविकथायाः संसूचनम्, कवेर्नाम्ना नायकस्य नायकेतरस्य वा नाम्ना महाकाव्यस्य शीर्षकं चयनम्। अथ ते अत्र कति कथञ्च इति परीक्ष्यते।

**महाकाव्यस्य शीर्षकम्**

सर्वेषु अङ्गेषु शिरः प्रधानम् इति नयेन प्रथमं शिरसि भवस्य शीर्षकस्य चर्चा विधीयते। महाकाव्यत्वस्य शीर्षकं परिभाषमाणो विश्वनाथो ब्रूते "**कवेर् वृत्तस्य वा नाम्ना नायकस्येतरस्य वा**" इति। तदनुसारं महाकाव्यस्य शीर्षकं क) महाकाव्यकर्तुः नाम्ना, ख) घटनावृत्तस्य नाम्ना, ग) महाकाव्यस्य नायकस्यैव नाम्ना, घ) इतरस्यापि नाम्ना संभवति इति उक्तम्। "इतरः" इति पदेन 'प्रतिनायकः, 'नायिका' वा तस्य अभीष्टमिति स्पष्टम्।

अत्र प्रस्तुतमहाकाव्यस्य शीर्षकं जगदीश्वरवैभवम्। जगदीश्वरो नाम भगवान् विष्णुः। तस्यैव नायकत्वात् तन्नाम्ना अस्य काव्यस्य शीर्षकं चितम् इति आपाततः प्रतीयते। परं महाकाव्यं पर्यालोचनाद् ज्ञायते यद् न भगवान् विष्णुर् अस्य महाकाव्यस्य नायकः। न च कथावृत्तं साक्षात् तत्सम्बद्धम्। तत्कथं जगदीश्वरो भगवान् काव्यस्य नायकोऽजायत, न च जगदीश्वरे प्रतिनायकत्वं संभवः। जगतः कर्तरि भगवति काव्यविशेषस्य कर्तृत्वमपि कल्पनातीतम्। तस्य इतरत्वं क्षुद्रत्वं वापि अकल्पनीयम् इति काव्यलक्षणस्य अप्रसक्तिं विचार्य एव काव्यकृता पन्थिना जगदीश्वरवैभवस्य शीर्षकस्य सार्थक्यं स्ववचसा एव साधितं वर्तते। जगदीश्वरवैभवस्य अवतरणे स लिखति - "अस्मिन् काव्ये स्वायम्भुवमनोः पौत्रस्य राज्ञ उत्तानपादपुत्रस्य ध्रुवस्य सपत्नमात्रा बहिष्कृतस्य पञ्चमेऽप्यब्दे दुष्करं तपस्तपस्यतः तत्तपसा मासषट्केनैव सन्तुष्यता भगवता विष्णुना षट्त्रिंशत्सहस्रवर्षपर्यन्तं राजराजत्ववरप्रदानात् अन्त्ये च वैकुण्ठलोकप्रदानाद् जगदीश्वरवैभवम् इति नामकरणं सार्थकं मत्वा तदेव नाम कृतम्''।

वस्तुतो भगवतो विष्णोर् वैभवं व्यञ्जनया वृत्या गम्यमानेऽपि न च तत् साक्षाद् मूलकथया सम्बद्धमिति काव्यं पर्यालोचयतो सर्वस्य प्रतीतिः। औत्तानपादिनो ध्रुवस्य बाल्याद् आरभ्य तस्य विष्णुलोकप्रस्थानपर्यन्तिका घटना अत्र वर्णिताः। अतः तत्प्रधानपात्रं ध्रुवम् एव अधिकृत्य विहितं ध्रुवचरितंम्, ध्रुवकथा इत्यादि ध्रुवपदयुतं अस्य महाकाव्यस्य शीर्षकम् उपयुक्ततरम्। तथा सत्यपि कविपन्थिना उक्तदिशा भगवतो विष्णोर् महिमा एव अत्र काव्ये

*व्याप्रियमाणत्वाद्* जगदीश्वरवैभवमिति शीर्षकमपि न च सर्वथा अनुपयुक्तम्।

**महाकाव्यस्य नायको ध्रुवः**

ध्रुवो महाकाव्यस्य नायकः। तस्यैव नायकत्वे जगदीश्वरवैभवस्य कथा अग्रे सरति। स धीरोदात्तः प्रकृतिकः। नाट्यशास्त्रदिशा तादृशो नायकः 'धीरोदात्तः' यो महासत्वः, अतिगम्भीरः, क्षमावान्, अविकत्थनः, स्थिरः, निगूढाहङ्कारः, दृढव्रतः अस्ति। ध्रुवेषु एते गुणाः सन्ति न वा इति विवेचनीयम्। एतेषां समेषां गुणानां विवेचनं अस्मिलँ्लघुलेखस्य गौरवाय अलम्। अतः केषाञ्चन परीक्षणम् अत्र विधीयते।

अतिगम्भीरः

कथावृत्तस्य आदौ ध्रुवः पञ्चमाब्दीयबालकरूपेण चित्रितो वर्तते। चापल्यं बालानां एवञ्च गाम्भीर्यं प्रौढानां लक्षणमिति सर्वैरनुभूतम्। परं ध्रुवस्तु बालः सन्नपि निजमानविषये अतिगम्भीर आसीदिति तस्य विमातृवचोविद्धत्वेन स्फुटीभवति। सुरुच्या विहितः स्वल्पोऽपि तिरस्कारः तस्म असह्यो जातः। सपत्नमातुः कोपनं सामान्यम्। निजबालेषु मोहनं परबालेषु प्रकोपनं विमातुः स्वभाव एव इति विचिन्त्य अन्यसाधारणो बाल इव ध्रुवो नाचरत् अपितु प्रौढ इव अतिगम्भीरो जातः। मनस्विनो जना निजमानविषयेऽतिगम्भीरा भवन्ति इति वशिष्ठादीनां महतां ऋषीणामाचरणैः स्पष्टम्। ध्रुवस्य तद् निसर्गगाम्भीर्यमेव तं बाल्ये एव वनं गत्वा तपस्तप्तुम् अथ च भ्रातुरुत्तमादपि उत्तमं पदम् आसादितुं प्रेरयति।

क्षमावान्

क्षमावत्वं नाम स्वस्य अपकारिण उपरि अपि प्रतिशोधराहित्यं दयावत्वं वा। ध्रुवः क्षमावान् आसीदिति तस्य दुष्टविमातरि अपि विहितेन क्षमया अवगम्यते। तस्य सन्तापस्य कारणम् विमाता एव। तस्या एव दुर्वचनैर् भिन्नहृदयः सन् स घनान्धं वनं जगाम। तथा सत्यपि ध्रुवो न हि तस्यां प्रतिशोधं ससाध अपितु तां विमातरमपि निजजननीमिव श्रद्दधौ इति तस्य तपसा निवृत्य गृहं प्रत्यागच्छति सति विमातुः पापद्मे कृतेन प्रणामनेन अवगम्यते - *स्वपादपद्मप्रणतमुत्थाय सुरुचिर्ध्रुवं जीवेत्याह परिष्वज्य साश्रुनेत्रा सगद्गदा ॥ जवै. ४।११* तथा च युद्धे निजानुजस्य घातके धनदनिकरेऽपि वैरभावं परित्यज्य क्षमावान् जातः। एभिर् दृष्टान्तैः स क्षमावान् अपि आसीदिति अवगम्यते।

निगूढाहंकारः

निगूढो गोपायितो वा अहंकारो येन स निगूढाहंकारः। अहंकारो मानसो भावः। ध्रुवो निगूढाहंकार आसीदिति तस्य शान्तस्वभावेन ज्ञायते। स जगदीश्वरस्य तपसा केनापि न प्राप्तम् अक्षयं ध्रुवलोकम् वररूपेण अवाप। ३६००० वर्षपर्यन्तम् उपभोग्यत्वेन पितू राज्यञ्च प्राप। अन्ते वैकुण्ठलोकगतिरपि भगवता प्रदत्तम्। एतावन्तं आशातीतं वरं प्राप्य अपि स न कदाचन अभिमानं प्रादर्शयत्। आमहाकाव्यं कुत्रापि तस्य अहंकारो न उद्गतः। अतः स निगूढाहंकारो नायकः।

अविकत्थनः

विकत्थनं नाम मिथ्याश्लाघा, मृषाप्रशंसा वा। अविकत्थनम् तस्य विपरीतम् अर्थाद् वितथस्तुतिराहित्यम्। ध्रुवस्तु पञ्चवर्षीयो बाल एव। तस्मिन् मृषावादस्य का कल्पना ?। पश्चाद् राज्यसिंहासनाधिरुढेऽपि तस्मिन् विकत्थनस्य भावो नायाति। कदाचित् तस्य आवश्यकता अपि तेन नान्वभूयत। यतो हि तेन सर्वम् अभीष्टं प्राप्तम्। तस्य कृते न कोऽपि दुर्जेयः, न च सन्तुष्यः वैरी। येन विकत्थनत्वम् प्रभवेत्। अतः स विकत्थनरहितो नायकः।

**पञ्चसन्धिः**

साहित्यदर्पणकृदादय आलंकारिका महाकाव्याङ्गत्वेन पञ्चसन्धिम् अपि परामृशन्ति । वस्तुतः पञ्चसन्धिर् नाट्याङ्गः । परं नाट्ये इव महाकाव्येऽपि कथावृत्तस्य सद्भावादालंकारिकैर् एतदपि महाकाव्याङ्गत्वेन गणितम् । अतः तेषां चर्चा अत्र विधीयते । सन्धिर्नाम कथावृत्तस्य आरम्भाद् विकसताम्, मध्य उत्कर्षं प्राप्नुवताम्, पर्यन्ते च पर्यवसायिनाम् मुख्येन सह अवान्तरवृत्तोपवृत्तानां परस्परं अन्वयनम् - एकेन प्रयोजनेन अन्वितानां कथानां कथांशानाम् अवान्तरार्थं प्रयोजनं सन्धिः - (श्रीनिवास, १९६९) । ते च पञ्चधा यथा- मुखम्, प्रतिमुखम्, गर्भः, विमर्शः, निर्वहणः । विमर्शनामा सन्धिः अवमर्श इति नाम्ना अपि व्यवह्रियते । विवेच्यमाने काव्ये ते सन्धयः कुत्र वर्तन्ते च कथञ्च इति विचार्यते ।

**मुखसन्धिः**

बीजस्य फलोत्पादकमूलत्वसमानाधिकरणधर्मत्वाद् लोकव्यवहारेषु इव पञ्च अर्थप्रकृतीनाम् मध्ये पि च आद्यत्वेन गृहीतम् इति स्पष्टम् । अत्र फलोत्पादने यथा बीजं मुख्यं काव्ये पि तथैव प्रारम्भिकं सार्थकं रससमन्वितं कथावृत्तं मुखमिति कारिकाया विवक्षा ।

प्रकृते जगदीश्वरवैभवे काव्ये ध्रुवस्य शिशुसुलभस्वभावात् सिंहासनासीने स्वपितुरङ्के निजानुजोतम इव आरुरुक्षति सपत्नमात्रा तस्मै विहितं दुराचरणम् तत् कथाया बीजम् । एतद्घटनान्तरमेव ध्रुवकथा प्रारभ्यते । ध्रुवस्य वनगमनवरप्रापणपुनरागमनादीनाम् उत्तरवर्तिघटनानाम् मुख्यं कारण सुरुचेः दुर्वचनं सत्वाद् एतद्धि ध्रुवकथाया मुखसन्धिः ।

**प्रतिमुखसन्धिः**

दूरात् पश्यते जनाय कृषिक्षेत्रे अङ्कुरद्, बीजम् ईषद् उद्धृतमपि यथा न सम्यग् दृग्गोचरम्, अपि तु मृत्तिकारचनजलसेकादिना अनुमेयम् भवति तथा प्रतिमुखसन्धौ प्रासङ्गिककथायोजनया, विदूषकचेट्याद्यवान्तरपात् रवर्णनया वा मुखसन्धौ उप्तं कथाबीजं अपरिलक्ष्यमाणं सन् पाठकैः कथाप्रसंगैर् अध्याह्रियते ।

प्रकृते जगदीश्वरवैभवकाव्ये स सन्धिः सुराणां भगवता विष्णुना सह जाते संवादे परिलक्ष्यते । विमातुर् दुर्वचनैर् भिन्नहृदयं ध्रुवमधिकृत्य आरब्धं कथावृत्तं मध्ये आपतितेन सुरहरिसंवादेन मनाग् अपरिलक्ष्यतां नीयते । सुरहरिसंवादस्य कारणं ध्रुवस्य कठोरं तपः । ध्रुवे श्वासं निगृह्य तपस्यति चराचरजगदेव निरुच्छ्वसतां जगाम येन भयभीता देवता भगवतः शरणं जग्मुः । भगवान् तस्य कारणं समाधानोपायञ्च प्रस्तुवन् तान् देवान् समाश्वासयाञ्चकार । अत्र स्वगत्या विकसद् ध्रुवकथावृत्तं, मध्ये आपन्नेन सुरहरिसंवादेन किञ्चिद् अलक्ष्यतां नीतम् अपि ध्रुवस्यैव प्रसङ्गस्य नैरन्तर्येण कथाबीजं न सर्वथा तिरोहितम् । अतोऽत्र प्रतिमुखसन्धिर् इति स्पष्टम् ।

**गर्भसन्धिः**

मुखप्रतिमुखसन्धिभ्यां क्रमशः उद्भिन्नतां प्राप्तस्य कथाबीजस्य पुनश्च गर्भे आधानम्, गोपनं वा गर्भसन्धिः । स सन्धिर् मूलतः काव्यपठताम् भावकानाम् औत्सुक्यवर्धनाय प्रतिनायकनायिकयोः कल्पनया, प्रतिकूलपरिवेशरचनादिना वा विधीयते । यद्यपि गर्भसन्धिः बहुत्र अनसंहितुं शक्यः, लेखलाघवाय द्वयोरेव अत्र उदाहृतम् - प्रथमो ध्रुवलोकरूपम् अपूर्वं वरं प्राप्य अपि असन्तुष्यतो ध्रुवस्य असन्तोषे, अपरो यक्षैः सह जाते युद्धे ध्रुवस्य मरणभीतौ ।

प्रथमे दृष्टान्ते नायकस्य घोरतपसा प्राप्तवरं प्रति अकस्माद् जाता अरुचिः काव्यपठताम् मनसि नायकस्य साफल्यविषये

उदिताम् आशां गर्भीकरोति। उत्तमीयादपि उत्तमं राज्यं वररूपेण प्राप्तुं ध्रुवः तपश्चचार। भगवदाशीर्वादात् प्राप्तमपि। अतः तेन सन्तुष्टेन भाव्यम् आसीत्। एतद् विपरीतं तस्मिन् प्राप्ते वरे सपदि उत्पन्नस्य तस्य वैनमनस्यं फलप्राप्तेर् आशां गर्भयति। एतावता अत्र प्रतिमुखसन्धिरिति।

**विमर्शसन्धिः**

यत्र नायकस्य फलप्राप्तेः संभावना ईषद् उद्भिन्ना परं न स्फुटा तत्र विमर्शसन्धिः। गर्भसन्धौ तु नायकस्य सफलत्वसम्भावना गर्भे एव स्थितो भवति। यतो हि नायकस्य सामर्थ्यं तदावधि अज्ञातम्। येन नायकस्य फलवत्वम् अनिश्चितम्। पाठको नायकस्य साफल्ये संदिहानः तिष्ठति। परं विमर्शसन्धौ नायकस्य सफलत्वसम्भावना आधिक्येन भवति। तदावधि नायको न्यूनेन एकां कठिनपरीक्षाम् उत्तीर्य स्वस्य साफल्यलक्षणं दर्शयति। अन्तरायेषु बहुषु सत्सु अपि नायकः तान् सर्वान् विजित्य अन्ते साफल्यं लभत एव इति निश्चयो विमर्शसन्धौ जायते। एष विमर्शसन्धिर् अपि प्रस्तुतकाव्ये बहुत्र अन्विष्टुं शक्यः। तथापि निदर्शनाय ध्रुवस्य यक्षैः सह जातस्य युद्धस्य प्रसंगम् उद्धृयते। युद्धे स्वपराजयम् अनुभवन्तो यक्षा ध्रुवं विभीय रणभूमितः पलाययितुं निजमायया नैकविधा घनघोररचनाः कृतवन्तः। दिगन्तरं भीषणार्णवध्वनिप्रतिध्वनितं चक्रुः। क्षणेन नभो मेघच्छुरितम् अभवत्। तडित्प्रभा दिक्षु पुस्फुरूः। जलमुचो प्रलयङ्कारि जलम् अमुञ्चन्। अम्बरतो रक्तम्बुधारा, रुधिराणि, मेदांसि, शकृन्मुत्रे च ववृषुः। सर्पा अक्षिभिर् वदनैश्च अग्निम् उद्गीर्य ससृपुः। व्याघ्राः सिंहा मदमत्तवारणा यूथीभवन्त इतस्ततोऽभ्रमन्। एवं समन्ताद् भयानकैः परिवेशैः परिवृत्तः सन् अपि ध्रुवो न अबिभेत्। भगवन्तं विष्णुं संस्मर्य यक्षैः सह युयोध विजयी च जातः।

मायारचनपूर्वमेव यक्षाणां परशुनिस्त्रिंशूलादिपरस्सहस्रान् शस्त्रान् स्वपराक्रमेण तृणायितवते ध्रुवाय तेषां मायारचना कौतुकाय एव न तु घाताय इति काव्यम् परामृशवतां स्पष्टमेव। एतवता प्रातिकूल्ये अपि नायकस्य फलोन्मुखत्वं सत्वाद् अत्र विमर्शसन्धिः।

**निर्वहणसन्धिः**

मुखप्रतिमुखसन्धिविमर्शसन्धिषु बीजायितम् ततः अंकुरत् क्रमश उद्गच्छद् वृत्तं यत्र एकार्थम् उपनीयते, अन्वीयते वा तत्र निर्वहणसन्धिः इति साहित्यदर्पणकारः। अत्र सन्धौ नायकस्य मुख्यफलप्राप्तिर् भवति। तत्फलप्राप्तौ साधनभूतानां सर्वेषां वृत्तोपवृत्तानाम् उपसमाहारो अत्र भवति। कथावृत्तस्य समाप्तिर्वा भवति।

प्रकृते काव्ये विमात्रा विहिताद् दुराचरणाद् आहतस्य मनस्विनो ध्रुवस्य वनगमनाद् उप्तं कथाबीजम्, तस्य भगवत्तपसा वरप्राप्तौ, वनात् प्रत्यागमने क्रमशोऽङ्कुरद्, उत्तमस्य वधे तस्य प्रतिकारार्थं यक्षैः सह जाते युद्धे उत्तरोत्तरं विकसद्, युद्धविजयानन्तरं, राज्यभारं स्वपुत्रम् समर्प्य बदरिकाश्रमगमने, तत एव विष्णुपार्षदैः सह ध्रुवलोकप्रयाणे समाहृयते। एतावता ध्रुवलोकप्राप्तिरूपं वरं ध्रुवलोकप्रयाणे साफल्यं लभते।

**रसविवेकः**

**अङ्गिरसः**

अस्य काव्यस्य अङ्गिरसः शमस्थायिभावात्मकः शान्तः। अस्य भावस्य आकाव्यम् अव्यभिचारेण अवस्थानात्। एतद् अतिरिक्तं वीरकरुणाद्भुतवीररौद्रभयानकबीभत्सादीनां केवलं यथाप्रसगं प्रकट्य तडिद् इव विलुप्तत्वात् न अङ्गित्वम्। शमाख्यो भावः कीदृश इति चेद् जागतिक्याः तृष्णायाः क्षयः 'शमः' इति नाट्यदर्पणकारः। अत्र काव्यस्य आरम्भे एव ध्रुवस्य राज्योपभोगरूपातृष्णा भगवतः सक्षात् दर्शनेन क्षीयते। अभीप्सातीतं वरं प्राप्य अपि स मुमूक्षति।

काव्ये सर्वत्र तस्य भगवति निराकांक्षा भक्तिर् वर्णिता। स कियत्कालम् निष्कटकं राज्यम् उपभुज्य स्वपुत्राय समर्प्य स्वपिता इव स वदरिकावनं गत्वा भगवतः समाधौ निमग्नो जातः। अनन्तरं पार्थिवं देहं त्यक्त्वा विष्णुपार्षदैः सह विष्णुपदं जगाम। अन्ये च नायकोपनायका नायिकाश्च परोक्षापरोक्षेण भगवत आराधनायां संलग्ना वर्तन्ते। भगवद्भक्तिपरत्वादेव सुनीतिः स्वतनयं तपस्तमुं प्रेरितवती। ध्रुवस्य अभ्युत्थानम् असहमाना सुरुचिश्च स्वार्थवशादपि तं भगवतो तप आदिदेश। उत्तानपादो ध्रुवे प्रत्यागच्छति राज्यभारं तस्मै समर्प्य भगवदाराधनाय वनं जगाम। इत्यादिभिर् आकाव्यं तृष्णाक्षयभक्तिमयानां घटनानां वर्णनादत्र अङ्गिरसः शान्त इति सिद्ध्यति।

**अङ्गरसाः**

आकाव्यम् अनभिव्याप्य प्रकरणविशेषे व्यापिनो रसा अङ्गरसाः। अत्र वक्ष्यमाणाः करुणाद्भुतबीभत्सभयानकादिरसा अङ्गिनं शान्तं परिपोषयितुम् अङ्गत्वेन उपनिबद्धा वर्तन्ते। केचिद् व्यभिचारिभावानाञ्च क्षणिकत्वसाधर्म्यम् आश्रित्य अङ्गरसव्यभिचारिणोः मिथः सामान्यं सिसाधयन्ति परं तन्न। यतो हि व्यभिचारिणः सौदामनी इव क्षणाय प्रचक्य सपदि एव प्रशमन्ति चेद् अङ्गरसा आप्रकरणम् अभिव्याप्य अवतिष्ठन्ते, ते निखिलरसनिष्पादनसामग्रीभिर् विभावानुभावसंचारिभिर् उपेताश्च भवन्ति। प्रकृते काव्ये उपर्युक्ताः करुणबीभत्साद्भुतरसाः कथं अङ्गत्वेन वर्तन्त इति साध्यते।

**अद्भुतरसः**

यः विस्मयं जनयति स अद्भुतः। अद्भुतरसस्य स्थायी भावो विस्मयः। आश्चर्जनकं वस्तु अस्य आलम्बनविभावः। तस्य वस्तुनो गुणकीर्तनम् उद्दीपनम्। नेत्रस्य विस्फारतारोमाञ्चादयोऽस्य अनुभावाः। वितर्कसंभ्रमादयो व्यभिचारिभावाः। अत्र काव्ये अद्भुतरसो ध्रुवस्य कठोरतपसः प्रसंगे निष्पन्नो दृश्यते - तत्र ध्रुवः प्रथमं केवलं पानीयं पित्वा मासं निनाय, ततः केवलम् अनिलं सेव्य, अन्त्ये तम् अनिलसेवनमपि परित्यज्य चरणैकेन उत्तिष्ठन् तपश्चचार। तपसः प्रभावात् तस्मिन् पादं न्यसति धरणिः करिणः चरणभारनमितनौरिव नमति स्म। तस्मिन् श्वासं निरुन्धति निखिलानां निःश्वसतां शरीरिणां श्वासः न्यरुन्ध्यत। तद् अद्भुतं दृश्यं दृष्ट्वा देवा नराश्च त्रेसुः। अत्र तादृशं विस्मयजनकगुणवन्तं ध्रुवं अवलम्ब्य उद्बुद्ध्य विस्मयः स्थायिभावः तस्य विस्मयकर्मभिर् उद्दीप्तः सन् नयनविस्फारणरोमाञ्चादिभिर् अनुभाव्यमान औत्सुक्यसंभ्रमादयै व्यभिचारिभिः पुष्यन् रसरूपतां प्राप्नोति।

**करुणरसः**

इष्टस्य नाशाद् अनिष्टस्य आप्तौ करुणः रस इति दर्पणकारः। अत्र काव्ये द्वितीयाध्यायस्य सप्तदशश्लोकात् तस्यैव उनविंशश्लोकपर्यन्तं वितते उत्तानपादस्य अनुतापे करुणः रसरूपताम् एति। पुत्रः सर्वस्य पितुर् इष्टः। पुत्रस्य नाशः, अदर्शनम् वा पितुः तापाय भवति इति अनुभवसिद्धम्। अत्र ध्रुवः पितरि असन्तुष्यन् राजसदनं परित्यज्य वनं जगाम। बालकध्रुवस्य वनगमनस्य कारणं तस्य पिता न कोऽपि अन्यः। यदि उत्तानपादः सुरुचिं यथासमयं प्रत्यवदिष्यत् ध्रुवः अपि वनं न अगमिष्यत्। अतः पुत्रोपरि कृतम् अन्याय्यं स्मारं स्मारं पश्चात्तापपारावारे निमग्न उत्तानपादः। तत्र राजसदने संयोगात् प्राप्ताय नारदमुनये तेन विहिते परिदेवने करुणरसः परिपाकम् उपैति।

**बीभत्सरसः**

घृणोत्पादकानां पूतिगन्धमेदोमूत्रशकृदादीनां वर्णानाद् यत्र निष्ठीवनम्, आस्यवलनम्, नेत्रसंकोचनादयो जायन्ते तत्र

बीभत्सा रस इति साहित्यदर्पणकारः । अस्य स्थायी भावो जुगुप्सा । प्रकृते काव्ये ध्रुवयक्षयुद्धप्रसंगे (षष्ठाध्यायस्य षड्विंशे श्लोके) यक्षा ध्रुवं बिभायिषया मायां प्रयुञ्ज्य नभसा रुधिरधारां, मेदांसि, शकृत्, नृत्यत्कबन्धानि वर्षयन्ति । अत्र मनसि सुषुप्ता जगुप्साभावो दुर्गन्धमांसमूत्रादीन् अवलम्ब्य उद्बुध्यते । पुरीषादिवर्षयता नभसा उद्दीप्यते । नयननिमीलनष्ठीवनादिभिर् अनुभाव्यमानः, आवेगव्याधिभिश्च अञ्जितः करूणा रसरूपतां प्राप्नोति ।

**भयानकरसः**

येन भीतिम् उत्पद्यते स भयानकः । अत्र काव्ये भयानकरसप्रयोगो ध्रुवस्य यक्षैः सह जाते युद्धप्रसंगे दर्शनीयः । मृगयार्थं गच्छति एकेन यक्षेण सह जाते विवादे मारितस्य अनुजस्य उत्तमस्य वधस्य प्रतिशोधं सिसाधयिषया यक्षलोकं गतस्य ध्रुवस्य अनेकेभ्यः यक्षेभ्यः सह जाते युद्धे घोरशस्त्रास्त्राणां प्रयोगो, भटानां हताहतवर्णनञ्च भयजनकं वर्तते । मुख्यतः पञ्चमाध्यायस्य द्वाविंशे श्लोके यत्र त्रिंशत्सहस्राधिकलक्ष्यसंख्यका यक्षा एकाकिनं ध्रुवं युगपत् शस्त्रास्त्रं प्रजह्रुः तद् वर्णनं भयानकरसताम् उपैति । अत्र प्रतिशोधकोपकुपितं ध्रुवं अवलम्ब्य उद्बुद्धो भयः स्थायी तीक्ष्णकृपाणबाण प्रहरणपाणिभिर् वैश्रवणैर् आकीर्णेन रणाङ्गणेन उद्दीपितः सन्, तेषाम् अङ्गनानाञ्च रोदनकम्पनादिभिर् अनुभाव्यमानो, मोहत्रासादिभिः सञ्चरन् रसतां प्राप्नोति ।

**अलङ्कारविवेकः**

**शब्दालंकारः**

यदाकदा काव्ये प्रयुक्तानि सुललितानि पदानि तेषां अर्थस्य आलोचनात् पूर्वमेव पदगतलालित्येन काव्यं पठतां शृण्वतां वा चेत आवर्जयति । तादृशां श्रुतिमधुराणां पदानां विन्यासपौर्वापर्यम् आवृत्तिञ्च आधृत्य पञ्च अनुप्रासालंकाराः कल्पिताः काव्यकोविदैः । ते च एष लाट-छेक-वृत्ति-श्रुति-अन्त्यानुप्रासाः । एतेषु व्यञ्जनसंघस्य स्वरूपतः क्रमतश्च असकृत् सकृदपि, एकधा अनेकधा च साम्ये वृत्यनुप्रासः । असौ वृत्याख्योऽनुप्रासः कविभिर् भूयसा प्रयुज्यते । विन्याससौकर्याद् अन्त्यानुप्रासोऽपि व्यापकः । तदन्ये लाटछेकश्रुतयः क्वाचित्काः । अनुप्रासातिरिक्तं पुनरुक्तवदाभास-श्लेष-यमक-वक्रोक्तयोऽपि शब्दालंकारे एव गण्यन्ते । तान् सर्वान् संयोज्य शब्दालंकारा अष्टौ गणिताः । तेषां श्लेषाख्योऽलंकारो वर्णप्रत्ययलिङ्गाद्युपभेदैर् अष्टप्रभेदयुतो दर्शितः । एतेषां समेषाम् अलंकाराणां सोपपत्तिकं निदर्शनम् अस्मिँल्लेखे असंभवात् केचन त्रिचत्वारा एव उदाहृयन्ते ।

**वृत्यनुप्रासः**

वृत्यनुप्रासो जगदीश्वरवैभवस्य नान्द्याम् एव विलसन् वर्तते । नान्द्या द्वितीयश्लोके शचयोर् असकृद् विन्यासः, प्रथमाध्यायस्य एकत्रिंशे श्लोके त्रघ्रद्र इति त्रीणि संयुक्ताक्षराणां विन्यासः, द्वितीयसर्गस्य प्रथमश्लोके सकारस्य असकृद् विन्यासः, द्वितीयसर्गस्य विंशतिश्लोकस्य पूर्वार्धे तववर्णयोर् अनेकधा विन्यासो वृत्यनुप्रासं दर्शयन्ति ।

**अन्त्यानुप्रासः**

श्लोकस्य अन्ते वर्तिनां पदानां, प्रतिपादम् आवृत्तिर् अन्त्यानुप्रासः । श्लोकस्य पादान्ते अनुस्वारस्य आवृत्तिर् यथा - सूर्यो यथा जनहितार्थमुदेति नित्यम्, तद्वद् भवानपि चरत्यचिरेण नित्यम् ॥ १।४२

पादान्ते हकारस्य आवृत्तिः यथा –विष्णुस्तु तं गरूडमाह्वयदात्मवाह-मागत्य सो पि किमहं क्व नयामि चाह ॥ २।३४

**अर्थालङ्कारः**

अलंकारो नाम भङ्गीभणितिः । भणितेर् भंगिम्नोऽनन्तत्वाद् अलंकारोऽपि अनन्तः । शब्दालंकारः पुनः शब्दपरिवृत्तेर्

अहसत्वात् अर्थालंकारपेक्षया सान्त इति वक्तुं शक्यम् । अर्थालंकाराणाम् अनन्तत्वेऽपि भणितेर् विच्छित्तीर् विश्लिष्य साहित्यिकैः तेषां संख्या स्वरूपञ्च निर्धारितम् । यद्यपि स्वाग्रहग्रहिलानां विदुषां संख्यास्वरूपयोरपि स्वल्पाधिकं वैमत्यं दृश्यते । केचित् परस्परं तिलतैलन्यायेन तथा च तिलतण्डुलन्यायेन स्थितान् अलंकारान् अपि परस्परं संयोज्य अस्य आनन्त्यं साधयितुम् इच्छन्ति चेत् केचित् अस्य स्वरूपानुरूपम् उपमागर्भविरोधगर्भादिषु मुख्यभेदेषु संकुचन्ति ।

प्रकृतकाव्यस्य महाकाव्यत्वसाधने विश्वनाथकृतं साहित्यदर्पणं मानदण्डत्वेन गृहीतत्वात् तदुक्तदिशा अलंकाराणां निरूपणमुचितम् । तन्मतानुसारेण अलंकाराः पञ्चसप्ततिः । तेषां समेषाम् अलंकाराणाम् एकस्मिन् काव्ये सद्भावो दुर्लभप्रायः । प्रकृते निर्धारितवर्णसीम्नि शोधलेखे सत्सु अपि तेषु अलंकारेषु न च सर्वेषां निदर्शनं संभवः । अतः केचन पञ्चषा एव अत्र उदाहृताः लेखगौरवभिया तेषां लक्षलक्षणसंगतिरपि न दत्ता ।

**उपमालंकारः**

पत्नीवशंवदतया जनकेऽप्युदारे, दण्डाहतोऽहिरिव रोषवशं जगामः ॥१।२२

भवत्पदाम्भोजसुधां समश्नतः सवत्सकं धेनुरिवासि प्रभो ॥३।२३

**अर्थान्तरन्यासः**

तस्मै हरिर्हि परमेष्ठिपदं दिदेश स्वाराधनं भगवतो विफलं कथं स्यात् ॥१।२८

धर्मो हरेश्चरणसेवया समैति मोक्षोऽपि तद्गतिविवेचनयैव लभ्यः ।

प्राप्ते द्वये सति परौ किमुतार्थकामौ तत्पादलीनमनसा भज वासुदेवम् ॥

**दृष्टान्तः**

रसूर्यो यथा जनहितार्थमुदेति नित्यम् तद्वद् भवानपि चरत्यचिरेण नित्यम् ॥१।४२

**सन्देहः**

यद्वा परेण रिपुणाऽभिभवोऽभवत्ते चिन्तानिमग्नमिव वेद्मि तथास्यबिम्बम् ॥२।१६

**उत्प्रक्षा**

स साध्वसं तं प्रपपात दण्डवत् दृशा प्रपश्यन् प्रपिबन्निव ध्रुवः ॥

मुखेन चुम्बन् हृदि धारयन्निव निपीय कुक्षौ पुनरायन्निव ॥३।४

**रूपकम्**

स साध्वसं तं प्रपपात दण्डवद् दृशा प्रपश्यन् प्रपिबन्निव ध्रुवः ॥

मुखेन चुम्बन् हृदि धारयन्निव निपीय कुक्षौ हृदि धारयन्निव ॥ ३।४

**काव्यलिङ्गम्**

त्वय्यार्पितज्ञानलवावलोकितमिदं समस्तं जगदीदृशं प्रभो

सुषुप्तबुद्धो हि यथा तथाऽऽस्म्यहम् भवत्पदाब्जार्चनजं फलं मम ॥३।१०

**विरोधाभासः**

सुचेतनस्त्वं स जडो विकारवान् भवाननादिः स तथाऽऽदिमान् भवेत् ।

भवानवश्यं भगवान् स निर्भगः गुणेश्वरस्त्वं परतन्त्र एषकः ॥३।२२

**अप्रस्तुतप्रशंसा**

हृदि स कुप्यति नोऽभिभविष्यति प्रथममेव समेत्य प्रसादय ॥

प्रियवचोभिरपि प्रणिपातनैः शरणदाः प्रभवन्ति महात्मनः ॥

**जगदीश्वरवैभवे वृत्तानि**

साहित्यदर्पणकृता महाकाव्यं लक्षयति **नानावृत्तमयः** इत्युक्त्वा छन्दसां वैविध्यम् अस्य घटकत्वेन निर्दिष्टम्। एतेन स्पष्टं यत् सत्सु अपि महाकाव्यत्वसाधकेषु वृत्तगुणालंकाररसपात्रादिषु सर्वेषु घटकान्तरेषु छन्दसां नानात्वाभावे काव्यं न महाकाव्यपदवीम् उपैति इति। एकस्य छन्दसः सद्भावेऽपि न महाकाव्यत्वाहानिः कीटानुविद्धरत्नवद्, न हि कीटानुविद्धत्वं रत्नस्य रत्नत्वं व्याहन्तुमीशम्, तत् कि बहूनां छन्दसां योजना अपेक्षिता इति चेत् सुदूरं गच्छते पथिकाय अतिविततोषवतः पथोऽपेक्षया गिरिणदीतडागोषरवान् नैकविधप्रकृतियुतो मार्गो रोचते तथैव एकस्वरयुतस्य छन्दसोऽपेक्षया विविधछन्दोयुतं काव्यं चेतसि सरसत्वमापादयति। एतेन छन्दसामपि वैविध्यापेक्षा महाकाव्यस्य गुणानुरूपा इति। प्रकृते जगदीश्वरवैभवे काव्ये प्रतिसर्गं नैकविधानि छन्दांसि प्रयुक्तानि वर्तन्ते। तस्य विवरणं यथा -

प्रथमसर्गस्य प्रथमश्लोकतः चतुर्थश्लोकपर्यन्तं शार्दूलविक्रीडितम्, पञ्चमतः सप्तचत्वारिंशत् पर्यन्तं वसन्ततलिका, अष्टचत्वारिंशत्तमः प्रहर्षिणी, द्वितीयसर्गस्य प्रथमश्लोकतः पञ्चत्रिंशत् पर्यन्तं वसन्ततिलका, षड्त्रिंशे शार्दूलविक्रीडितम् छन्दः प्रयुक्तम्। तृतीयसर्गे प्रथमश्लोकतः चत्वारिंशत् पर्यन्तं वंशस्थः, एकचत्वारिंशे वसन्ततिलका, द्विचत्वारिंशे शार्दूलविक्रीडितम् छन्दा रचितम्। चतुर्थसर्गे प्रथमश्लोकतः अष्टत्रिंशत् पर्यन्तम् अनुष्टुभ्, ऊनचत्वारिंशे शार्दूलविक्रीडितम् छन्दो वर्तते। एवमेव प्रकृते काव्ये सर्वेषु सर्गेषु अनेकेषां छन्दसां प्रयोगो वर्तते।

**सर्गान्ते भाविसर्गस्य कथायाः संसूचनम्**

सर्गान्तं नाम वर्ण्यमानवृत्ते क्षणिको विरामः। यद्यपि नायं कथायाः पटाक्षेपः, अवसानम् वा तथापि प्रेक्षमाणानां कौतुककर्तनाय अलम्। अत औत्सुक्यस्य नैरन्तर्याय महाकाव्यस्य सर्गान्ते भाविकथायाः संसूचनं आवश्यकम्। अधुना टेलिभिजनपदवाच्याद् दूरदर्शनात् प्रसार्यमाणेषु धारावाहिकेषु चलचित्रेषु अपि सर्गस्य (एपिसोड इत्यस्य) अन्ते भाविकथायाः संसूचनं विधीयते येन द्रष्टारः सर्गान्तरं प्रेक्षितुं सप्ताहं यावत् कौतुकापन्ना अवतिष्ठन्ते। प्रकृते काव्ये तद् सर्गान्ते भाविकथायाः संसूचनं वर्तते न वा सत्यपि कति सर्गेषु वर्तते च तदिति परीक्ष्यते।

**प्रथमसर्गस्य अन्तिमः श्लोकः**

इत्युक्त्वा नृपतनयो मुनिं प्रणम्य हस्तौ द्वौ शिरसि निधाय नारदाग्रे ॥

अश्रूणां झरिभिरहो मुनेः पदौ द्वावासिञ्चन् कथमपि बद्धमौन आसीत्।

प्रथमसर्गस्य कथाया अन्तो नारदर्षेर् उत्तरं ध्रुवे सुश्रुषति भवति। अमुना श्लोकेन अत्र काव्यं पठतां मनसि उत्सुकता वर्धते, इतः परं नारदः किं ब्रूयात्, ध्रुवस्य प्रश्नं कथम् उत्तरेद् इति जिज्ञासया पाठकः सर्गान्तरकथाम् पिपठीषति। विमातृवचसा आहतत्वाद् वनं प्रस्थितं ध्रुवं केनापि उपायेन नारदो गृहं प्रत्यावर्तयति उत भगवत्प्राप्तेर् उपायं परामृशन् वन एव प्रेषयति इति कुतूहलं एष उदाहृतोऽन्तिमः श्लोक उत्पादयति।

## निष्कर्षः

अत्र लेखे महाकाव्यस्य संघटकत्वेन गणितानां रण-प्रयाणोपयम-मन्त्र-पुत्रादिभ्याम् तथा च सन्ध्या-सूर्येन्दु-रजनी

प्रदोषाध्वान्त-वासराभ्याम् ऋते अन्यत् सर्वं परीक्षितम् । महाकाव्यशीर्षकस्य सार्थक्यं परीक्षितम्, ध्रुवस्य नायकत्वं परीक्षितम्, मुखप्रतिमुखगर्भसन्धिविमर्शाश्च अनुसंहिताः, शान्तरसस्य अङ्गित्वमन्येषाम् अङ्गत्वञ्च परीक्षितम्, अलंकारछन्दांसि च परीक्षितानि, सर्गान्ते भाविकथा संसूचिता न वा इत्यपि परीक्षिता । एतत् सर्वं परीक्ष्य काव्यमिदं महाकाव्यमेव इति साधितम् । ध्रुवस्य धीरोदात्तनायकत्वं साधितम्, मुखप्रतिमुखादयो महाकाव्यङ्त्वेन गणिता नाट्याङ्गाश्च सोपपत्तिः साधिताः, छन्दोलंकाराश्च प्रदर्शिताः, अङ्गाङ्गिरसाश्च सविस्तारं प्रदर्शिताः, सर्गान्ते भाविकथासंसूचनमपि स्थापितम् । एतावता महाकाव्यस्य संघटकत्वेन गृहीतानां सर्वेषां तत्वानां प्रकृते काव्ये नियतावस्थानम् इति साधितम् । अतः काव्यमदो जगदीश्वरवैभवं सर्वथा महाकाव्यम् एव नात्र कश्चित् संदेहोऽवशिष्टः ।

## कृतज्ञताज्ञापनम्

प्रकृते शोधलेखलेखने सहाय्यमाचरेद्भ्यो सर्वेभ्यो विद्वद्भ्यः सुहृद्भ्यश्च हार्दं कार्तज्ञं समर्पयामि ।

## सन्दर्भग्रन्थसूचिः

अर्याल, भेषराज (२०७७) *महाकवि पं. भीमकान्त पन्थीका व्यक्तित्वका प्रमुख विशेषताहरू*, हाम्रो पुरुषार्थ, माघ-चैत्र अङ्क, पृ. ४१२-४१६

अर्याल हरिहर शर्मा (२०७७) *जगदीश्वर वैभवम् महाकाव्यः विहंगम दृष्टिमा*, हाम्रो पुरुषार्थ, माघ-चैत्र अङ्क, पृ.३८५-३९०

आचार्य, विश्वनाथ (सन् १९७७) *साहित्यदर्पणः* विमलाव्याख्याविभूषितः (व्याख्याता शालिग्रामशास्त्री), मोतीलाल वनारसीदास प्रकाशन

आत्रेय, विष्णुराज (२०५५) भूमिका, जगदीश्वरवैभवम्, लक्ष्मीकान्त पन्थी काठमान्डू

तिमिल्सिना, महानन्दः (२०७३) *जगदम्बिकावैभवमहाकाव्यस्य साहित्यिकं परिशीलनम्*, अप्रकाशित शोधप्रबन्ध, नेसंवि,

तिमिल्सिना, महानन्द (२०७७) *कवि पं. भीमकान्तपन्थीका कृतिहरूको संक्षिप्त समीक्षण*, हाम्रो पुरुषार्थ, माघ-चैत्र अङ्क, (पृ. ३१७-३३९)

पन्थी, टीकारामः (२०५५) भूमिका, *जगदीश्वरवैभवम्*, लक्ष्मीकान्त पन्थी, काठमान्डू

शर्मा मुकुन्द (२०७७) *जगदीश्वर वैभवम् महाकाव्यमा उपस्थापित विषय*, हाम्रो पुरुषार्थ, माघ-चैत्र अङ्क, पृ. ४६९-४७३

सिग्देल रञ्जन (२०७७) *जगदीश्वरवैभवम् एक समीक्षा*, हाम्रो पुरुषार्थ, माघ-चैत्र अङ्क, पृ. ४२१-४२८